Volume: 1 Issue: 2 Pages: 26-28




# समकालिकशिक्षाप्रणाल्यां संस्कृतस्य प्रभावः प्रसक्तिश्च।

*1 Dr. Nishad TS

*1 Assistant Professor, Department of Vedanta, Sree Sankaracharya University of Sanskrit, Kalady, Kerala, India.

**Article Info.**
**E-ISSN: 2583-6528**
**Impact Factor (SJIF): 3.477**
**Peer Reviewed Journal**
**Available online:**
**www.alladvancejournal.com**

**Received:** 23/Oct/2022
**Accepted:** 19/Nov/2022

***Corresponding Author**
**Dr. Nishad TS**
Assistant Professor, Department of Vedanta, Sree Sankaracharya University of Sanskrit, Kalady, Kerala, India.

**सारांशः**
अस्य लेखस्य प्रमुखं लक्ष्यं शिक्षायाः तात्त्विकाधारं, भाषायाः स्थानं, विशेषतः संस्कृतभाषायाः शिक्षणप्रासंगिकतां च प्रकाशयितुमस्ति। अत्र शिक्षायाः निर्मितिस्वरूपं त्रिधेतुसंयुक्तं मन्यते— उपादानं (अध्येता), निमित्तं (अध्यापकः), सहकारी (शिक्षापद्धतयः) इति। शिक्षायाः फलप्राप्त्यर्थं एतेषां समुचितविकासः आवश्यकः। भाषायाः शिक्षायाम् अनिवार्यस्थानं प्रतिपाद्यते, यतः भाषा एव विचारविनिमयस्य, सृजनशीलतायाः च मूलाधारः। मातृभाषा, राष्ट्रभाषा, सांस्कृतिकभाषा, अन्तर्राष्ट्रीयभाषा इत्यादि वर्गीकरणेषु संस्कृतस्य सांस्कृतिकभाषारूपेण विशेषमहत्त्वं दर्शितम्। भारतस्य सांस्कृतिकवैभवस्य, दार्शनिकचिन्तनस्य, वैज्ञानिकजिज्ञासायाश्च आधारभूता संस्कृतभाषा शिक्षाक्षेत्रे प्राथमिकस्तरादारभ्य योजनीया इति तत्त्वं प्रतिपादितम्। लेखे माक्स् म्यूलर्, विन्टर्निट्ज्, डॉ॰ एस्॰ आर्॰ भट्टः इत्यादि विदुषां मतानि साक्ष्यरूपेण उद्धृतानि सन्ति, ये संस्कृतस्य सार्वलौकिकप्रासंगिकतां प्रतिपादयन्ति। संस्कृतभाषा केवलं प्राचीनस्मृतिसंचिका न, अपि तु विश्वसौहार्दस्य, वैज्ञानिकदृष्टेः, मानवीयरचनाशीलतायाश्च सशक्तं माध्यममिति निर्णीतम्।

**मुख्य शब्दः** शिक्षा – निर्मितिकर्म – भाषा – संस्कृतम् – सांस्कृतिकभाषा – शिक्षणम् – मानवसभ्यता – भारतीयसंस्कृति – वैज्ञानिकचिन्तनम्।

## प्रस्तावना:

## भूमिका

शिक्षा नाम निर्मितिकार्यं भवति। निर्मितिक्रियायां हेतुत्रयमपेक्षते उपादानं, निमित्तं सहकारी चेति। अत्र उत्तममानवनिर्मितिरेव निर्मितिक्रियायाः मुख्योद्देश्यः। कार्येऽस्मिन् अध्येतारः भवन्त्युपादानं, अध्यापकाः निमित्तं, शिक्षापद्धतयः सहकारी च भवन्ति । त्रयाणामपि एतेषां सुष्टुर्विकासे जाते सत्येव शिक्षायाः उद्देश्यः साफल्यं प्राप्नोति। उपादानरूपशिष्याणां नैपुण्योत्सर्गः शिक्षाकाले एव संभवति। निमित्तानां शिक्षकाणां नैपुणिः शिक्षणपूर्वपरिशीलनैः स्वयंशिक्षणैश्च सम्पादितव्या। अतो अत्र अधिको विचारः सहकारीविषये करणीयमेव। पाठ्यविषयः, पद्धतिश्च विभागेऽस्मिन् अन्तर्भवति । वस्तुतस्तु किं पठनीयं ?, कथम् पठनीयं ? किमर्थं पठनीयम् ? इति विचार एव सफलशिक्षायाः पूर्वपीठिका ।

## मानवसभ्यतायां संस्कृतस्य स्थानम्

मानवसभ्यतायाः संस्कृतेश्च विकासे भाषायाः स्थानं महत्वपूर्णं भवति । न केवलं विचाराणां विनिमयः, विचारप्रवृत्तिरपि भाषां विना दुश्शक एव। इयं चिन्तनशीलता एव इतरजीवजातिभ्यः मानवानां वैशिष्ट्यम् । विशेष सभ्यतायाः उत्पत्तिहेतुत्वमपि चिन्तायां निहितमस्ति । एवं मर्त्याणां दैनन्दिनजीवने व्यावहारिककुशलता, अपेक्षितज्ञानं, भावनात्मकानुभूतिः, रसास्वादनं, रचनात्मकसामर्थ्यञ्च भाषायाः सद्दानमेव। एवं सफलजीवनस्य पथदर्शित्वेन परिणमते भाषा। अतः शिक्षायां भाषाऽध्ययनस्य, अध्यापनस्य च विशेषमहत्वमस्ति । यदि सुजीवनस्य सन्नाहः भवति शिक्षा तर्हि तल्लक्ष्यप्राप्तये प्रबलं साधनं भवति भाषा।

## भाषासु विविधता

मातृभाषा, राष्ट्रभाषा, सांस्कृतिकभाषाषा, अन्धाराष्ट्रीयभाषा एवं भाषा बहुविधा वर्तन्ते । तेषु मातृभाषा भवति सर्वाधिकप्रभावशालिनी इत्यस्मिन् न सन्देहः। यतः मातृस्तन्येन सह स्वयं शिक्षिता भाषा खलु मातृभाषा । विशेषदेशस्य सामाजिकसमरसतायै, राजनैतिककार्याणां सुसंघाटनाय, देशीयाखण्डता संरक्षणाय च राष्ट्रभाषा उपकरोति । प्राचीनकालादारभ्य देशविशेषस्य परम्परार्जितज्ञानविज्ञाननिधीनां जीवनमूल्यानां च वाहिनी भाषा सांस्कृतिकभाषा। प्रतिदेशस्यात्मवैभवः अनयैव भाषया सुष्टुप्रकाशते । विभिन्नदेशेषु मध्ये सञ्चालनीय क्रय-विक्रयाणां, विज्ञानविनिमयानां च अधारो भवति अन्ताराष्ट्रीयभाषा ।

## संस्कृतस्य विशेषमहत्त्वम्

विशिष्टदेशस्य सांस्कृतिकसम्पत्तिं सुस्पष्टमवगन्तुं सांस्कृतिकभाषाध्ययनमवश्यमेव। अस्माकं देशस्य, भारतस्य सांस्कृतिकभाषा भवति संस्कृतम्। विना संस्कृतभाषापरिचयं भारतस्य परिचयमपूर्णं दुष्करञ्च भवति। पाश्चात्यविदुषा विन्टेर्निट्स् महाभागेन उक्तमस्ति यत्,

"If we wish to learn to understand the beginnings of our own culture, If we wish to understand the oldest Indo-European culture, we must go to India, where the oldest literature of Indo-European people is preserved." [1]

अतः शिक्षाक्षेत्रे प्राथमिकस्तरादारभ्य संस्कृताध्ययनस्य प्रसक्तिरस्ति। एवं किं पठनीयमिति पूर्वोक्तस्य प्रथमप्रश्नस्य समाधानं भवत्येतत्, संस्कृतं पठनीयमिति। विषयेऽस्मिन् प्रत्येकभाषावादिनां मध्ये विरोधस्यावकाशो नास्त्येव । विशेषभाषासु विशेषदक्षताः सन्ति । भाषा तु न स्थितिशीला वर्तते, तत् सर्वथा दान-प्रदानाभ्यां विकासोन्मुखगतिशीला भवति। विशेषतः अस्माकं मातृभाषायां प्रतिशतं पञ्चसप्तति संख्यात्मको पदसम्पदः संस्कृतभाषातः स्वीकृतमेव । अतः मातृभाषाध्ययनेन साकं संस्कृताध्ययनमपि क्रियते चेत् अस्याः भाषायाः सान्द्रता सारवत्ता च प्रवर्धेत । संस्कृतभाषया कैरलीभाषा पदसम्पदा अतीवानुग्रहीता वाक्यघटनया सुसंबद्धा च भवति। संस्कृतग्रन्थाणां व्याख्यानरूपेण अनुवादरूपेण च रचनाबाहुल्यं कैरल्यां संस्कृतस्य प्रभावं स्पष्टीकरोति। अतः संस्कृताधिष्ठितमातृभाषाशिक्षणं मनसः, बुद्धेः, संस्कृतेश्च यथोचितं वृद्धिकारकं भवति ।

## अध्यापन-शिक्षणयोजना

कथमध्ययनमध्यापनञ्च कर्तव्यमिति द्वितीयः प्रश्नः अध्यापकशिक्षणयोजना: भवति। तत्र सहजतासिद्धान्तः, अभ्याससिद्धान्तः, रुचेः सिद्धान्तः, सक्रियतायाः सिद्धान्त इत्येवं अध्यापने बहुविधाः रणनीतयः सन्ति। संश्लिष्टता, संक्षिप्तता च संस्कृतस्य विशेषताऽस्ति। अतः संस्कृताध्ययने अध्यापने च अज्ञानात् ज्ञानं प्रति, सरलात् कठिनं प्रति, स्थूलात् सूक्ष्मं प्रति बोधविकासः करणीयः । वर्तमानशिक्षाक्षेत्रे प्रभावीशिक्षा इति तत्त्वस्य महत् स्थानमस्ति । यदा अध्येतारः स्वीयायोजिते शिक्षणे समर्थाः भवन्ति तदा अध्यापकाः केवलं मार्गदर्शकरूपेण तिष्ठन्ति। इदं स्वेनायोजितशिक्षणमेव प्रभावीशिक्षणस्य मापकः । अतः कोशग्रन्थानां, व्याख्याग्रन्थानां, अनुवादग्रन्थानां साहाय्येन संस्कृतभाषावबोधनाय, स्वाध्यायसामर्थवर्धनाय च श्रद्धा देया। भाषायाः सहजावबोधः अनुकरणेन अभ्यासेन च संभवति। भाषाशिक्षणे, विशेषतः मातृभाषातिरिक्त भाषाशिक्षणे अभ्यासमत्यन्तमपेक्षितं भवति। संस्कृतं नित्यजीवनव्यवहारस्य भाषा न भवतीत्यतः तस्य अध्ययनं विद्यालये एव संभवति । अतः संस्कृतस्य श्रवणाय, भाषणाय, पठनाय, लेखनाय च समुचिताशिक्षणपद्धतिः विद्यालयेषु अवश्यं निर्मातव्या ।

## संस्कृतस्य ऐतिहासिकं योगदानम्

किमर्थं संस्कृतमिति तृतीयप्रश्नविचारस्य अधिका साधुता अस्ति। प्राचीनकाले जीवनस्य समस्तमण्डलेषु महत्वपूर्णानां ज्ञान-विज्ञानानां आविष्कारः संस्कृतभाषया कृतमस्ति। लौकिकस्तरीयस्यात्मीयस्तरीयस्य च जीवनस्य समग्रविचारः तत्र दृश्यते। प्रमुखेन पाश्चात्यदार्शनिकेन माक्स् मूलेर प्रभृतिना

'India-What can It teach us', नामक स्वीयग्रन्थे उक्तं यत्, "Whatever sphere of the human mind you may select for your special study, whether it be language, or religion, or mythology, or philosophy, whether it be laws or customs, primitive art or primitive science, everywhere, you have to go to India, whether you like it or not, because some of the most valuable and most instructive materials in the history of man are treasured up in India, and in India only." [2]

अत्र परामृष्टज्ञानराशेः वाहिकाऽस्ति संस्कृतभाषा। भाषादिशा सम्पुष्टा समग्रा च भवतीयं भाषा । संस्कृतेनाविष्कृतजीवनमूल्यानि तु सार्वलौकिकानि सार्वकालिकानि च भवन्ति । परस्परविद्वेषस्य स्थाने भावपारस्पर्यस्य समभावनायाः सन्देशो अत्र दृश्यते । विशिष्य संस्कृते दृदयमानानेक सहस्राणि सुभाषितानि अज्ञातकर्तृकाणि मर्त्यं प्रेरयन्ति। एवं जीवजातीनां पारस्पर्याधिष्ठित यज्ञभावनायाः श्रेयोमूलकत्वमुच्यते भगवद्गीतायां, तत् यथा,

"सह यज्ञा प्रजासृष्ट्वा पुरोवाच प्रजापतिः।
अनेन प्रसविष्यध्वमेषवोऽस्तविष्ट कामधुक् ॥
देवान् भावयतानेन ते देवाः भावयन्तु वः।
परस्परं भावयन्त श्रेयः परमवाप्स्यथ" [3] ॥ इति।

जीवनस्य समस्तस्तरेष्वपि संस्कृतस्य योगदानं सुनिश्चितमेव। भाषाशास्त्रे, साहित्ये, कलासु, चिकित्साशास्त्रे, वास्तुशास्त्रे, राजनीतिकस्तरे, दार्शनिक क्षेत्रे च संस्कृतस्य विज्ञानवैभवं पुरस्कृत्य डॉ एस् आर भट्टः महाभागेन निरीक्षितमरित, यत्, "Sanskrit

literature presents a sustained effort at recording spiritual experiences, intellectual deliberations, scientific discoveries emotional poetic exhibitions and artistic creations of a culture which is one of the most ancient and, at the same time, the most wonderful. And this effort cannot be said to have an end. In this grand effort no part of India can claim its exclusive contribution all its parts from south to North and East to west have equally contributed to it. It is the only Indian language which over-rides the regional differences and linguistic peculiarities and attains a true national character. [4]

भारतीयवैज्ञानिकजिज्ञासायाः परिणतिरूपेण लब्धशास्त्रपद्धतयः सन्ति गणित, आयुर्वेद, वास्तुविद्या, नगरनिर्मितिः, यन्त्रनिर्मितिः इत्यादयः। अस्य शास्त्रविज्ञानस्य सुबोधनार्थं संस्कृतज्ञानमनिवार्यं भवति। आधुनिक शिक्षाक्षेत्रे विशिष्य विश्वविद्यालयस्तरीयेषु, तारतम्यशास्त्रस्य अनेके नूतनपाठ्यप्रयोगाः आविष्कृताः सन्ति । चिकित्सा-निर्माण-राजनैतिकक्षेत्रेषु एतादृश पाठ्ययोजनानां प्रसक्तिरनल्पैव। विषयेऽस्मिन् भट्टमहाशयस्यायं वचः सार्थक्यमावहन्ति। तैरुक्तं यत्,

"The Contribution of Sanskrit to the sphere of Sciences, (physical, Physiological and Social), Mathematics and fine arts is much more significant. Here was the field where the Indians not only were the forerunners but they also excelled all others. The spirit of scientific inquiry and vigorous search for the cause to explain the diverse phenomena of the world on a scientific basis was the dominant note of the early Indian thought. The scientific teachings and methodology developed in different spheres were so accurate and adequate as to demand imitations from the other nations of the world." [5]

संक्षेपतया विश्ववैभवस्य साहोदर्यस्य च दर्शनं संस्कृतेन आविष्कृतमस्ति। विश्वं भवत्येकनीडमिति चिन्ता सार्वलौकिक समभावनायाः निदर्शनं भवति । उक्तं च पञ्चतन्त्रे, "अयंनिजः परोवेति गणना लघुचेतसाम्। उदारचरितानां तु वसुधैव कुटुम्बकम्" [6] इति।अतः लोककल्याणाय संस्कृतस्य वैचारिकयोगदानमध्ययन क्षेत्रे अवश्यं योजनीयमेव। सर्वे जनाः सामान्यसंस्कृतज्ञाः भवेयुः।

## निष्कर्षः

लेखस्य समग्रसन्देशः एषः- संस्कृतभाषा न केवलं भारतस्य अतीतगौरवस्य प्रतीकः, किन्तु वर्तमानशिक्षायाः भावीमार्गदर्शिका अपि। शिक्षायाः त्रिधेतुव्यवस्था- अध्येता, अध्यापकः, शिक्षणपद्धतिः- एषां समन्वयेनैव शिक्षायाः सार्थकता। संस्कृताध्ययनं न केवलं भाषाज्ञानप्राप्तये, अपि तु मनसः, बुद्धेः, संस्कृतेः च शुद्धये आवश्यकं। विज्ञानं, दर्शनं, साहित्यं, कला, चिकित्सा, वास्तु इत्यादिषु क्षेत्रेषु संस्कृतस्य योगदानं अद्वितीयम्। "वसुधैव कुटुम्बकम्" इति

संस्कृतवाङ्मये निहितं वैश्विकमानवसौहार्दं यावत्कालं प्रासंगिकमेव। अतः शिक्षाक्षेत्रे संस्कृताध्ययनं सर्वत्र प्रसार्यं, यतः संस्कृतं सर्वभूतहिताय, समरसमानवसभ्यतायै च प्रभावकरं साधनं भवति।

**References**


1. Moriz Winternitz. A History of Indian Literature, Vol. I, Introduction, I, 6.
2. Max Müller. India: What Can It Teach Us? , Funk & Wagnalls, Publishers, Newyork, 2007, 33.
3. Bhagavadgita, III-10,11
4. Dr. SR Batt. Sanskrit and its Intellectual Tradition, MLBD, 42.
5. Ibid, 48.
6. Pañcatantra, 5-37.